श्रीरामः ।

मुकुन्ददेवात्मनिदर्शनम् ।

(तंत्र)

वृत्ताख्यानम् ।

—*-०-*—

श्रीविश्वनाथचरणाम्बुजलग्नचेतो-
भूदेव-सेवन-रतस्य महामहिम्नः ।
गोविन्दवन्दननितान्तमुदो मुकुन्द-
देवस्य साधुचरितं परिशीलयामः ॥ १ ॥

'मु'कोऽत्र जन्मनि यशोनिचये च 'कुन्द-'
कान्तो 'मु'खोद्भव'कु'लोज्ज्वलता'न्द'धानः ।
भू'देव' नामचरमांशसमाप्तिपूतः
सत्यार्थवर्णविवृतः स मुकुन्ददेवः ॥ २ ॥

यः सत्यपालनरतः सकृदात्मवाचो
वतथ्यमा कटुपाकमुदाजहार ।
आत्मस्तुतिर्न च विनिन्दनमन्यदीयं
श्रोत्रे सुखं वचति यस्य पदं च वाक्ये ॥ ३ ॥

आर्त्तोऽपि यो नहि मुहूर्त्तमपि स्वकर्म
तत्याज तच्चिचरितादिकथानुबन्धि ।
तस्योच्चहास्यबहुलास्यपवित्रभावं
प्राणात्ययेऽप्यविकृतं सततं स्मरामि ॥ ४ ॥
तातं पुराणमुनिमेव स मन्यमानः
शास्त्रे च तद्वचसि चात्मनि तुल्यभक्तिः ।
शास्त्रार्थसंशयतमःशमने पुनस्तद्-
वाणीमबोधि निशि देवगृहे प्रदीपम् ॥ ५ ॥
कीर्त्तिं स पाठसमये सुचरित्र-तर्क-
प्रज्ञाबलादि-जनितां किल यामवाप ।
दोषोज्झितक्रमविवृद्धगुणाभिमृष्टा
सा निर्म्मला च महती च शनैर्बभूव ॥ ६ ॥
बुद्ध्या स्वया सहजया जनकोपदेश-
ज्येष्ठानुवर्त्तनसदाचरितादरैश्च ।
उल्लेखनज्वलनवस्तुविशेषशक्ति-
योगेन का[illegible]नमिवाज्ज्वलतां स लेभे ॥ ७ ॥
विद्यावि[illegible]ध्यधिदितोत्तमरत्न[illegible]र्णो
नैवात्यगात् समुचितस्थितिहे[illegible]भावाम् ।
रोषाभिमानविकलोऽपि पितुः स वाचम्
नो लङ्घते।जलनिधिः क्षुभितोऽपि वेलाम् ॥ ८ ॥
राज्ञः स शासनविभागनिर[illegible]ककर्म्मा
प्रादेशिकोच्चपदमप्युपलभ्य साधुः ।

न्याय्यात् पथो न विचचाल रहस्यभ्रा
लब्ध्वापि मुख्यपुरुषस्य विरुद्धरूपाम् ॥ ९ ॥
प्राप्ते दिवं पितरि वत्सरमात्रपूर्त्तौ
ज्येष्ठे च दारसहिते पितुरन्तिकस्थे ।
एको बभार परिवारमनेकबालं
ज्येष्ठागतां धुरमपि स्वपदोचितां च ॥ १० ॥
कार्य्यं पुरा यदभवद्विदुषां त्रयाणां
यत्नेन बुद्धिविभवेन तथार्जनेन ।
एकस्तदेव निरवर्त्तयदप्रमत्तः
शेषो दधाति धरणीधुरमेक एव ॥ ११ ॥
भूदेवदेवकृतदानविधिव्यवस्था-
संवादपत्रभरणप्रभृतिक्रियाणाम् ।
प्रागवत् समाचरणमुन्नतिभिस्तु पूर्णं
तस्याभवत् प्रवसतोऽपि सतः सुबुद्धेः ॥ १२ ॥
ताताङ्घ्रिपङ्कजकृताङ्कमनुप्रपन्नो
गोविन्दवृत्तिमकृताग्रजनामपुण्याम् ।
तत्सम्मतां च 'वड़मा'भिधवृत्तिमन्यां
तद्दारमङ्गलफलस्मृतिशुद्धिहेतुम् ॥ १३ ॥
धर्म्माय स प्रियममन्यत मातृभाषा-
संसेवनं न यशसे न तथा धनाय ।
वित्तं परोपकृतये न निजोपभुक्त्यै
चित्तं च साधुमननाय न दुःस्पृहायै ॥ १४ ॥

कार्य्येषु तस्य सुमहत्स्वपि नीरवत्वं
ग्रन्थे स्वयंविरचिते न च कर्त्तृनाम ।
इत्यात्मन् सिसहितेऽखिलसाधुकृत्ये
गाढप्रवृत्तिर ...त्र मुकुर्लभाद्य ॥ १५ ॥
अन्यैरभीप्सितपदाप्नृपशक्तिपूर्णा-
दादाय मोऽवसरमुज्झितकालवृद्धिः ।
काश्यामुवास निजधर्म्मरतो मनस्वी
पुत्रादिशोकमपि दुर्व्विषहं स सेहे ॥ १६ ॥
काशीनिवासिबुधसे नयोग्यमार्गां
भूदेववृत्तिमकरोदथ [illegible] ।
स्वर्गीयपुत्रचरिताभिध-सोमदेव-
सत्कर्म्मभाण्डानिचयं च बहुप्रबन्धम् ॥ १७ ॥
तन्मूलसंश्रितमवान्तरकोषजा-
स, कर्म्मसाधनमथास्य रहस्यदानम् ।
वैदुष्यमार्जवमनाविलदेशधर्म-
भक्तिश्च विश्वहिततां स्फुटयांब भुः ॥ १८ ॥
चूडामणेरभिमतोचित"धर्म्मशास्त्र-
कोषो"पपादनविधौ वसुवर्षणेन ।
प्रोत्साहनेन समुपक्रमणेन चासीत्-
स श्रीहिजन्मनि पयोद इवाद्य हेतुः ॥ १९ ॥
शोकेषु कर्म्मगुरुता तदुदीर्णखेदे
कर्त्तव्यगौरवमतिश्च शमाय जज्ञे ।

योऽयं शमः स शमनेन समो नहीनो (१)
व्याधिं व्यधत्त हृदि तस्य बलावलोपः ॥ २० ॥
अथ रल्लदितमथामथमेनम सः
शारीरशक्तिमुपचेतुमना यथेष्टम् ।
व्यायाममभ्यरिलङ्घनजं चचार
तस्मात् फलं शुभमयं न पुनः स लेभे ॥ २१ ॥
तस्मिन्नदृसहृदयो निजकार्य्यजात-
सम्पादनाय नियतं त्वरितो बभूव ।
व्याधिः स्फुटोऽजनि बहुप्रसरस्तथापि
तत्याज कर्म्म न कदापि स कर्म्मवीरः ॥ २२ ॥
एवं विनिर्ज्जितबहिर्बलताविलक्षो
व्याधिर्बभूव हृदि तस्य पुनर्निगूढ़ः ।
मायाविनां प्रकृतिरीश्वरनिर्मितेयं
मेघावृतोऽकृत रणं किल मेघनादः ॥ २३ ॥
इत्थं रुजा विवृतसंवृतघोरमूर्च्छा
नीतोऽवसादमुचितामृतसारशेषः ।
आसीत् शशीव पितृतृप्तिकृतां क्रियाणां
निर्व्वर्त्तको मलिनपक्षमनुप्रपन्नः (२) ॥ २४ ॥

(१) शमः शमनेन समः हीनो न, अथ च—न—हीनः नकारमात्रेण हीनः शमन-शब्दो नकारहीनः शमो भवति ।

(२) शशिनो रोगः पौराणिककथाप्रसिद्धः । उचिता-तसारशेष उचितः योग्यः यः आमृतं मरणपर्य्यन्तस्थायी सारः अथवा

कलकातया न हि विनेहशदुर्बलत्व-
व्याधेश्चिकित्सितमलद्वि फलोपधावि ।
तत्रैव गम्यमचिराद्भवतेतिवाचं
स स्वैर्जनैरभिहितामपि नाभ्यनन्दत् ॥ २५ ॥

"श्रीस्वामिपादशुभसङ्गति-तर्करत्न-
चूड़ामणि-प्रणयमेलनजां मुदं याम् ।
काश्यां भजामि मदनामयतृप्तिहेतुं
नान्यत्र से"ति कथयन् न जहौ स काशीम् * ॥ २६ ॥

क्रीतं मया भवनमाशु दिदृक्षमाणो
यो दुर्बलोऽपि दयिता-तनया-सहायः ।
आगत्य सायमधिक[illegible]
मूर्छा[illegible] स ततः स्वसुखं जगाद ॥ २७ ॥

यः अमृतसारः अमृतस्य मृत्युपर्य्यन्तमप्राप्तस्य सारः स्थिरांशः यस्य स्थिरांशस्य सत्ता आमृत्यु तिष्ठति तन्मात्रशेषः। शशिपक्षे कृष्णप्रतिपदादि[illegible] कलाक्षयेण अमृतत्व[illegible]ादूयत्र तिथौ यथा-[illegible]तस्थितिश्चिता तन्मात्रशेषः। मलिनपक्षं विषण्णस्वजनं कृष्णपक्षं च । कृष्णपक्षो हि पितृकर्मयोग्यः । अर्थान्तरं च भाव्यम् ॥

* स्वामिपादाः श्रीभारतधर्ममहामण्डलप्राणभूतश्रीस्वामिमहाराजाः। चूड़ामणिर्महामहोपाध्यायः श्रीअ[illegible]चरणतर्कचूड़ामणिः । तर्करत्नः मूलरचयिता ॥

शीर्षं निधाय शिथिलं प्रतनौ मदङ्के
चूडामणेः करपरीततनुः शयानः ।
कालं कियन्तमतिवाह्य शनैरवादीत्
"अप्राप्त [illegible]शयनीयसुखं मयासम्" ॥ २८ ॥
तस्यास्मदर्थविपुलश्रमदर्शनेन
खेदं ह्रियं च न लभेय यथा तथोक्तिम् ।
युक्तां चकार तदनुस्मृतिलब्धखेदो
हा व्यर्थमद्य विलपामि तदुज्झितोऽहम् ॥ २९ ॥
यो रोग[illegible]ोकमलिनोऽपि सुदुःखितोऽपि
दृष्ट्वैव मादृशजनं सविधोपयातम् ।
नीरोगशोक इव हर्षविकस्वरास्यः
स[illegible] सङ्कथाभिरनुरञ्जयति स्म सद्यः ॥ ३० ॥
योगीव सोऽवगतदेहविमुक्तिकालो
भूदेवदेवचरितं त्वरितं समाप्य ।
कर्म्मान्तरं च विनिवेश्य यथार्हपात्रं
प्रत्यैक्षत स्वजनुषश्चरमप्रशान्तिम् ॥ ३१ ॥
यत्किञ्चिकाय कृतयेऽद्य तदह्नि तस्मिन्
युक्तश्चकार न ररक्ष दिनान्तरार्थम् ।
कार्य्याव[illegible]षद्दृढबन्धनखिन्नचेताः
शान्तिं न मृत्युसमये लभते मनुष्यः ॥ ३२ ॥
सोऽचिन्तयत् प्रतिदिनं पितरौ सुतौ च
ज्येष्ठादिकान् निजजनांश्च यदन्तिकस्थान् ।

तत्पादपङ्कजयुगलं कुलदेवताया
द्रष्टुं चकाङ्क्ष चरमं धुंधुड़ास्थमूर्तेः ॥ ३३ ॥
"यासां सभक्तिकसमर्च्चनमात्मकार्य्य-
मापूर्व्वपूरुषमभूत्सतत निर्व्यलीकम् ।
तासां न पूजनमहा कुलदेवताना-
मस्मद्विसमक्षमपि, यत् क्रियते परेण" ॥ ३४ ॥
इत्थं निवेद्य स बहिस्तदुपानिनीषां
व्यक्तीचकार दयितेषु जनेषु धीरः ।
काश्यां तदन्तिमविलोकनकाममन्तः स्वा-
मन्तः पुपोष सुकृतीत्यधुना तु विघ्नः ॥ ३५ ॥
स्थानान्तरोपनयने गृहदेवतानां
वारद्वयं किल बभूव महाननर्थः ।
तत् सन्तु ता निजगृहेष्विति शंसतः स्वान्
संकल्पितं स्वमजहत् स सुधीरुवाच ॥ ३६ ॥
"अस्मत्परोक्षमपरेण कृता कथञ्चित्
पूजैकतश्च परतस्त्वशुभस्य शङ्का ।
पूजा च नोऽभिमुखमात्मकृतापि वा स्या-
देवं स्थितेऽत्र परमं चरमं वृणोमि" ॥ ३७ ॥
मामेकदा स विनिवेद्य समस्तवृत्तं
सेवागसः प्रतिविधिं विहितमप्यपृच्छत् ।
तद्व्याहृतिं निजजनाभिमतां च शंसन्
शास्त्रोपदेशमवगन्तुमियेष भक्तः ॥ ३८ ॥

"द्वेधा चलाचलतया प्रातमापतिष्ठा
या स्याच्चला नहि नदानयनं निषिद्धम् ।
योग्योऽत्र वाष्पशकटाहितशुद्धिकल्पा
नौर्व्वाश्रयस्तदनयोः परमोऽन्त्यकल्पः" ॥ ३९ ॥

श्रुत्वेति मामकवचः स विहस्य किञ्चि-
दूचे "सविघ्नसविलम्बगतिर्हि नौका ।
वाष्पीययानमनुशक्तिविशोध्यकल्प-
मालम्ब्य" मित्यथ तथानयदीप्सितार्चाः ॥ ४० ॥

तद्दर्शनप्रणतिवन्दनपूर्णकाम-
प्रायोऽखिलस्वजनमेलनया च तृप्तः ।
वैशाखशुक्लहरिवासर-कर्म तात-
श्राद्धं विधाय चरमं परमाबभाषे ॥ ४१ ॥

"एकादशी स्वजनदुःखकरी मृतस्य
न द्वादशीमपि तिथिं वरयामि भद्राम् ।
यात्रासुमङ्गलकरीं गुणभूमिमानां *
मन्ये तिथिं मरणकर्म्मणि सुप्रशस्ताम्" ॥ ४२ ॥

स द्वादशीमपि तिथिं स्ववशः सभाया-
मामन्त्रितश्च मिलितश्च निनाय साधुः ।

* गुणभूमिमानां त्रयोदशीम् । अथ च गुणभूमिः गुण-
ज्ञानं मानं परिमाणं यस्यास्तां सर्वांशतो गुणवतीं नतु
गुणतृतीयादिवत् एकांशतो त्रिघ्निगुणाम् ।

स्वोक्ते दिने दिनमुखे क्रमशोऽवसन्नो
निःस्नेहदीप इव स प्रशमोन्मुखोऽभूत् ॥ ४३ ॥
प्राक्प्राणनिर्गममथ प्रहरार्द्धमात्रे
चूड़ामणिं सविधमागतमेव दृष्ट्वा ।
'नन्वागतोऽसि' कथयन्निति कण्ठदेशे
प्रीत्या स बाहुविटपेन समालिलिंग ॥ ४४ ॥
श्रीविश्वरूपहरिदर्शनयोगमग्र्यं
चूड़ामणिप्रपठितं श्रुतिसारभूतम् ।
गीतागतं प्रणिहितेन हृदा निशम्य
खट्वाङ्गभूप इव शान्तिमगात् क्षणेन * ॥ ४५ ॥
भास्वन्मुखश्रियमवेक्ष्य भियेव मृत्यु-
स्तस्यान्तिकं न समुपेतुमलं बभूव ।
मृत्युञ्जयेन विहितः प्रशमस्त्वमृत्यु-
स्तं दुःखसंकुलभुवः स्वयमाजहार ॥ ४६ ॥
उच्चः स्वरेण वपुषा हसितेन चोच्चः
प्रोच्चः सुनिर्म्मलयशोभिरपि क्रियाभिः ।
अत्युच्चधाम समवाप महोच्चनामा
नीचैः स्थिता वयमहो विधिना हताः स्मः ॥ ४७ ॥
हा हा 'कुमार' 'सर' 'भास्कर' हा'ऽनुरूपे',

* दिलीपापरनामा खट्वाङ्गो नाम राजा मुहूर्तमात्रावशिष्टमायुर्निशम्य तत्क्षणात् परमात्मनिवेशितमना मुक्तिमगादिति पुराणकथा ।

हा यामबस्तदितरा न परं गुरुर्वः ।
देशस्य रत्नमपि यो हरता तमद्य
दैन्यं न कस्य सुजनस्य कृतं विधात्रा ॥ ४८ ॥
यस्योपदेशवचनं श्रुतसत्यपूतं
यस्यामला व्यवहृतिर्मुनिषूपलभ्या ।
तन्नित्यसेवनविलोकनपुण्यपुञ्ज-
भ्रष्टास्तु यूयमनुशोच्यदशां प्रपन्नाः ॥ ४९ ॥
हा हा कुमारजननि ! त्वमभूर्गृहस्य
लक्ष्मीर्मुकुन्दपतिसङ्गतिलाभभाग्यात् ।
तेनाधुना विरहिता सहसा च्युतश्री-
रस्मादृशां द्विगुणमाधिमुपादधासि ॥ ५० ॥
बन्धो मुकुन्द न भवान् परिशोचनार्हः
काश्यां विमुक्ततनुरक्षतपुण्यशीलः ।
भाग्यादभूभवादृशमहापुरुषप्रियत्वं
प्राप्तास्ततो विरहिता वयमेव शोच्याः ॥ ५१ ॥
योगीन्द्रमिन्द्रमपहाय च कृष्णचन्द्रं *
जीवामि यत्प्रणयदिव्यरसाभिषिक्तः ।

* योगीन्द्रः 'बङ्गवासी' संवादपत्रप्रतिष्ठाता योगीन्द्रचन्द्र-वसुः । इन्द्रः पञ्चानन्दादिप्रणेता 'बङ्गवासी'-रक्षकः सुप्रसिद्ध इन्द्रनाथवन्द्योपाध्यायः । कृष्णचन्द्रः 'बङ्गवासी'संपादकः कृष्ण-चन्द्रवन्द्योपाध्यायः ।

हा हन्त सम्प्रति जहौ स च मां मुकुन्दो
मृत्युञ्जय त्वमथ मा त्यज मामनाथम् ॥ ५२ ॥

चूडामणे ननु भवान् प्रशमप्रधानोऽ-
प्येतच्छुचो गुरुभरेण निपीड्यतेऽद्य ।
शैलोपमोऽपि विटपी बलिनानिलेन
प्रोन्मूल्यते तदिह तत्त्वमनुस्मरामः ॥ ५३ ॥

मुकुन्दमिलदङ्गता मम पुराणगादंगता
प्रतीतिमुपपद्यतामपि नवीनशिलाभृताम् ।
इतीव मदनान्तकोऽवसितकाममत्तस्रजं
विभूतिमपि बिभ्रतं स्ववपुषा तमन्वग्रहीत् ॥ ५४ ॥

जय त्रिजगदीश्वर त्रिपुरनाशन त्र्यम्बक
त्रितापभयभञ्जन त्रिगुण-सिन्धु-निस्तारक ।
त्रिविग्रह विनाशनीं त्रिवपुषः कुरुष्वाद्य नो
भवच्चरणपङ्कजस्थिरमतीन् मुकुन्दप्रिय ॥ ५५ ॥

वृत्ताख्यानं समाप्तम् ।

खण्डन-विद्यासागरीय-पंक्तिविचारः ।

अनष्टभूतिर्विदिताष्टभूति-
र्मृत्युञ्जयो यो यमशक्तिवश्यः ।
स सर्व्व एकोऽर्द्धशिवश्च पूर्ण-
शिवो भवो मे भवहानयेऽस्तु ॥ १ ॥
शोकश्रमामयमये समयेऽपि यस्य
प्रीतिः पुरा मम कृतिश्रवणेन जाता ।
तत्-सर्वदुःखपरिशून्य-मुकुन्द-देव-
सम्प्रीतयेऽद्य वितनोमि नवप्रबन्धम् ॥ २ ॥
प्रसादिता न या पंक्तिः सहस्रमुखसूरिभिः ।
यत्नोऽयं तत्प्रसादाय श्रीपञ्चाननशर्मणः ॥ ३ ॥

अथ खण्डनखाद्यीयविद्यासागरीतिप्रथितव्याख्यायाः पंक्ति विशेषपरिष्कारार्थं प्रस्तूयते ।

सा हि पंक्तिः 'चौखाम्बासंस्कृतसिरियेस' इत्याख्यग्रन्थ-राशीनामेकाशीतितमखण्डीयखण्डनफक्किकाविभजनाख्यविद्या-सागरीतिप्रसिद्धटीकान्तर्गता व्याख्याता च सा प्रसिद्धविदुष महामहोपाध्यायगङ्गानाथझामहोदयेन ।

तद्व्याख्यानं न समीचीनतया प्रतिभाति—तथाहि—"इयं पृथिवी सकर्तृकाकर्तृकवृत्तित्वरहितानेकाकर्तृकवृत्तित्वरहि-तानेकतन्निष्ठाधिकरणं मेयत्वाद् घटवद्"-इति विद्यासागरीय

पंक्तिस्तद्व्याख्यानं चैवम्—“अत्रानुमाने ‘इयं पृथिवी’ इति पक्षः ‘सकर्तृकाकर्तृकवृत्तित्वरहितानेकाकर्तृकवृत्तित्वरहितानेकतन्निष्ठाधिकरणम्’ इति साध्यम्, मेयत्वादिति हेतुः। सकर्तृका घटादयः अकर्तृका गगनादयः एतदुभयवृत्तित्वरहितः अथच अनेके अकर्तृकाः परमाणव आत्मानो जात्यादय आकाशादयश्च तन्निरूपितवृत्तित्वरहितं यदनेकं शब्दः घटत्वादिकं च [यतः शब्द आकाशरूपेऽकर्तृके वर्त्तते किन्त्वाकाशोऽनेको न भवति तथा च घटत्वमनेकेषु घटेष्वस्ति किन्तुघटा अकर्तृका न भवन्ति] तन्निष्ठो धर्म्मः शब्दगतः सकर्तृकत्वरूपः घटत्वनिष्ठो नित्यत्वरूपः एतदुभयधर्म्मस्यान्यतराधिकरणत्वमत्र साध्यते” इति।

अत्र प्राक् ‘तन्निष्ठाधिकरणम्’ इतिसाध्यमित्युक्त चरमञ्चान्यतराधिकरणत्वमत्र साध्यते इति कथितं तयोः सामञ्जस्यं लक्षणाश्रयमन्तरेण न सम्भवति न च व्याख्याने लक्षणा युक्ता, मुद्राकरप्रमादश्चेदस्तु तावदन्यत्रावधीयताम् तद्यथा—प्रथम रहितान्तव्याख्याने रहित इति पुंलिङ्गनिर्देशः, द्वितीयरहितान्तव्याख्याने च रहितमिति क्लीबलिङ्गनिर्देशः तस्माद्रहितान्तद्वयं नैकस्य विशेषणं किन्तु प्रथमरहितान्तं निष्ठः (धर्म्मः) इत्यस्य द्वितीयरहितान्तमनेकमिति विगृहीतभागस्य चेति एवं स्थिते अनेकतन्निष्ठेति गर्भस्थं ‘तत्पदं’ व्यर्थमभिमतान्वयबाधकं च। अनेकनिष्ठधर्म्मयोः सकर्तृकत्वनित्यत्वयोरन्यतराधिकरणत्वस्य साध्यत्वे अनेकपदार्थेन निर्विशेषणकनिष्ठेत्यस्यान्वये कर्त्तव्ये तत्पुरुषसमासान्तर्गततत्पदस्य व्यवधा-

यकतया बाधकत्वात्। अत एव सामर्थ्याभावात् समासा-सम्भवश्च। चरममनेकपदमपि व्यर्थम्। अनेकाकर्त्तृकवृत्तित्व-रहितनिष्ठेत्यनेनैव शब्दनिष्ठसकर्त्तृकत्वस्य घटत्वादिनिष्ठनित्य-त्वस्य च लाभात्। अपिच द्वितीयरहितान्तदलमपि निष्प्र-योजनकं न च तदनुपादाने द्व्यणुकादीनां ग्रहणसम्भवेन तन्निष्ठधर्म्मस्य तावदन्यतमत्वस्य लाभात् सिद्धसाधनमिति वाच्यं तदुपादानेऽपि अनेकाकर्त्तृकवृत्तित्वरहितं यदनेकं घट-पटादि तन्निष्ठत्वेन तावदन्यतमत्वस्य व्युदासासम्भवेन सिद्ध-साधनतादवस्थात्। द्व्यणुकानां परमाणुद्वयवृत्तितया द्वितीय-रहितान्तत्वविरहेऽपि द्व्यणुकघटपटाद्यन्यतमत्वस्य द्व्यणुके-ष्विव घटपटादावपि वृत्तितया तथाविधानेकनिष्ठत्वात्ततः। न च तथाविधानेकमात्रनिष्ठ एव धर्म्मो विवक्षितः द्व्यणुक-साधारणान्यतमत्वस्य तथात्वाभावान्नोक्तदोष इति वाच्यं सकर्त्तृकत्वस्य द्व्यणुकसाधारणतया तस्य साध्यकोटौ प्रवे शानुपपत्तेः। न च निरीश्वरमते द्व्यणुकादौ सकर्त्तृकत्वं नास्तीति न तस्य साध्यकोटिबहिर्भाव इति वाच्यं तन्मते तु अकर्त्तृकजन्ये द्व्यणुकादौ सकर्त्तृकत्वनित्यत्वान्यतराधिकर-णत्वाभावाद् व्यभिचारप्रसङ्गात्। प्रथमरहितान्तं तन्निष्ठध-र्म्मविशेषणमपि व्यर्थं न च वाच्यत्वादिकमादाय सिद्धसाधन वारणाय तत्, एवमपि द्व्यणुकाद्यन्यतमत्वं परमाणुवृत्तिगन्ध-प्रागभावादिकं नित्यत्वं चादाय सिद्धसाधनस्य दुर्व्वारत्वात्। किञ्च सकर्त्तृकत्वं नित्यत्वञ्चेतिवत् सकर्त्तृकमकर्त्तृकत्वं च

साध्यकोटौ प्रवेष्टुमीष्टे तथा च द्व्यणुकाङ्कुरादावकर्तृकत्व-सिद्धावर्थान्तरं दुर्वारम्, निरीश्वरमते द्व्यणुकादावकर्तृ-कत्वजन्यत्वयोरङ्गीकारात्। तस्मादनवबोधविधुरा विद्यासाग-रीयतत्पंक्तिव्याख्या।

अथासौ परिष्क्रियते।

इयं पृथिवीति द्व्यणुकाङ्कुरादिकं दृश्यमानभूमण्डलं वा सकर्तृकत्वेन विमता पृथिवीति समुदितार्थः घटपटात्मकपृथिव्याः पक्षत्वव्युदासाय इयमिति विशेषणम्। सामानाधिकरण्येन सिद्धेरवच्छेदावच्छेदेनानुमितिप्रतिबन्धकत्वमिति प्राचां मतमादृत्यैव तद्व्युदासप्रयासः। यस्मिन् सकर्तृकत्वाकर्तृकत्वयोरन्यतरनिश्चयः तस्य पक्षत्वं न भवति सन्दिग्धसाध्यकस्यैव पक्षतौ-चित्यात् तदतिरिक्ता पृथिवी पक्ष इति बोधयितुमियमिति वा। रहितान्तद्वयमेकस्यैव विशेषणम्। विशेष्यदलञ्च अनेकत-न्निष्ठेति। तदर्थश्च एकतन्निष्ठभिन्नो धर्मः। एकं एकव्यक्ति-मात्रस्वरूपं यत् तत्पदवाच्यं सकर्तृकं प्रक्रान्तेषु तस्यैव प्रथमोपस्थितत्वात् तत्र निष्ठो वृत्तिमानिति कर्मधारयगर्भ-तत्पुरुषः। न एकनिष्ठः अनेकनिष्ठः स च धर्मः अनेक सकर्तृकवृत्तिः सकर्तृकत्वादिः, अकर्तृकैकमात्रवृत्तिः तत्तद्व्यक्तित्वादिश्च तदधिकरणत्वं साध्यम् साध्या-नुगमायाधिकरणत्वप्रवेशः। सकर्तृकाकर्तृकोभयनिरूपित-वृत्तित्वशून्येति प्रथमरहितान्तार्थः एतद्दलानुक्तौ एकैकद्व्यणु-काद्व्यक्तिघटपटाद्यन्यतमत्वमादाय निरीश्वरमतेऽपि साध्य-

सिद्ध्यार्थान्तरं स्यात् । तन्मते द्व्यणुकादेरकर्त्तृकत्वेऽपि तत्साधारणप्रागुक्तान्यतमत्वस्य द्व्येकैकद्व्यणुकादिवृत्तितयानेकाकर्त्तृकवृत्तित्वविरहात् एकमात्रसकर्त्तृकनिष्ठभिन्नत्वाच्च । तदलोक्तौ तु निरीश्वरमते तथाविधान्यतमत्वञ्च सकर्त्तृकाकर्त्तृकवृत्तित्वेन न साध्यकुक्षौ प्रवेशः । न च तदलोक्तावपि तन्मते द्व्यणुकाद्यकर्त्तृकमात्रवृत्त्यन्यतमत्वमादायार्थान्तरताद्वस्थ्यमिति वाच्यं द्वितीयरहितान्तदलेन तद्वारणात् । किञ्च द्वितीयरहितान्तानुपादाने सकर्त्तृकत्वमकर्त्तृकत्वं चेति द्वयमेव साध्यकोटौ प्रविशति ततश्च निरीश्वरमते द्व्यणुकादावकर्त्तृकत्वमादायार्थान्तरं स्यात् तदुपादाने तु अकर्त्तृकत्वस्यानेकाकर्त्तृकवृत्तित्वविरहाभावेन ग्रहीतुमशक्यत्वात् नोक्तदोषः । परमाण्वादौ व्यभिचारवारणाय अनेकेत्यकर्त्तृकविशेषणम् । अनेकेत्यादिविशेष्यदलानुक्तौ च गन्धाद्यधिकरणत्वमादाय सिद्धसाधनम्, तदुपादाने तु घटादिगन्धस्यैकसकर्त्तृकनिष्ठत्वात्तत्साधारणनिरूपकताकाधिकरणत्वस्य न साध्यकोटौ लाभसम्भवः । न चैकसकर्त्तृकावृत्तिर्यः परमाणुगन्धः तन्निष्ठा या गन्धत्वावच्छिन्ननिरूपकता तन्निरूपिताधिकरणत्वस्य सर्वत्र पृथिव्यां सत्वात् सिद्धसाधनताद्वस्थ्यमिति वाच्यम् अनेकतन्निष्ठेत्यनेन एकमात्रसकर्त्तृकवृत्तित्वस्याधिकरणतानिरूपकतायां विशेषणतया विवक्षितत्वात् । गन्धत्वावच्छिन्ननिरूपकतायास्तत्र घटादिगन्धसाधारणतया तत्तद्घटादिगन्धस्य चैकमात्रसकर्त्तृकवृत्तितया ग्रहीतुमयोग्यत्वात् । नन्व-

नेकनिष्ठेत्येवोच्यतां तेनैव गन्धादिव्यावृत्तिसम्भवे किं सकर्त्तृ-कार्थकेन तदित्यनेनेति चेन्न रहितान्तद्वयविशेषणकस्यानेकनिष्ठध-र्मस्य परमाण्वादावसत्वेन तत्र व्यभिचारात् । तदित्युक्तौ च परमाण्वादिनिष्ठतत्तद्व्यक्तित्वादेरेकमात्रसकर्त्तृकवृत्तिभिन्नत्वेन रहितान्तद्वयलभ्यत्वेन च साध्यमध्ये प्रविष्टतया व्यभिचार-शङ्कानवकाशात् । न चैवमपि निरीश्वरमते द्व्यणुकादेर-प्यकर्त्तृकत्वेन तत्तद्व्यक्तित्वमादायार्थान्तरमिति वाच्यं त-दिति तत्पदेन सकर्त्तृकतया स्वाभिमतस्य जन्यमात्रस्य फलतः प्रक्रान्तत्वेनोपादानात् तथा चानेकतन्निष्ठेत्यनेनानेकजन्य-निष्ठस्य धर्म्मस्य साध्यकोटौ प्रवेशात् द्व्यणुकादिगततद्व्यक्ति-त्वस्य निरीश्वरमतेऽपि एकजन्यनिष्ठत्वेन व्युदासान्नार्था-न्तरमिति । अथवा तत्पदप्रयोगोऽयमापाततः, द्व्यणुकादिगत-तत्तद्व्यक्तित्वमादाय दोषः समुद्भाव्यते चेत् तद्वारणाय तत्-पदस्थाने जन्यमात्रं निवेशनीयम् । कल्पद्वय एवानेकजन्ये-त्यस्य एकमात्रजन्यभिन्नेत्यर्थः, घटद्वयं नैको घटः इति प्रत्य-याद्द्व्यणुकद्वये एकमात्रजन्यभिन्नत्वं वर्त्तत एवञ्च सकर्त्तृ-कत्वमात्रस्य साध्यकोटौ प्रवेशः एतेन "सकर्त्तृकेति प्रथमविशेष-णादले कृतिमज्जन्यार्थकसकर्त्तृकेत्यत्र कृतिमदंशो विफलः जन्या-कर्त्तृकवृत्तित्वरहितेत्यस्यैव सम्यक्त्वात्, तद्वैफल्ये च द्वितीय-विशेषणदलविशेष्यदले अपि विफले द्व्यणुकादिमात्रवृत्तिधर्म्म-स्यापि निरीश्वरमते जन्याकर्त्तृकोभयवृत्तित्वेन धर्त्तुमशक्यतया तमादायार्थान्तरासम्भवात्, स्वमते द्व्यणुकादेः सकर्त्तृकत्व एव

तद्वृत्तिधर्म्मस्य साध्यकोटौ प्रवेशात् तत एव फलतः सकर्त्तृ-कत्वस्य तत्र तत्र सिद्धिरिति न सिद्धसाधनापत्त्यवकाशः। निरीश्वरमते द्व्यणुकादौ जन्यत्वमकर्त्तृकत्वं चास्तीति तद्धर्म्म-स्य तन्मते साध्यकोटौ न प्रवेशसम्भव इति भवत्येवान्तिमविशे-षणदलस्य विशेष्यदलस्य च वैफल्यम्। तस्मात् सकर्त्तृकेत्यादि-प्रथमदलस्य कृतिमद्विशिष्टवृत्तित्वशून्येत्यर्थो, वाच्यः, वैशि-ष्ट्यं च स्वजन्यनिरूपितत्वस्वाजन्यनिरूपितत्वोभयसम्बन्धेन। वृत्तित्वांशे कृतिमत एव सम्बन्धद्वयेन विशेषणत्वबोधनाय सकर्त्तृकाकर्त्तृकेति, न तु साध्यकोटौ कृतिमता द्विधा प्रवेशः न वा वस्त्वन्तरस्य जन्यतानिरूपकतया प्रवेशः। एवञ्च सक-र्त्तृकाकर्त्तृकेत्यत्र कृतिमज्जन्यस्य प्रकारविधया प्रवेशाभावेन कृतिमदंशवैफल्यं न शङ्कास्पदं भवितुमर्हति। सकृत्प्रविष्ट-कृतिमदंशमनुपादाय वस्तुमात्रप्रवेशे तु निरीश्वरमते तत्परमा-णुजन्यत्वादिमात्रसिद्ध्यार्थान्तरं स्यात् तत्परमाणुजन्यत्वं हि तत्परमाणुविशिष्टवृत्तित्वशून्यं भवति स्वजन्यनिरूपितत्वसम्ब-न्धेन तद्वृत्तित्वे तत्परमाणोः सम्बन्धित्वेऽपि स्वाजन्यनिरूपि-तत्वघटिततथाविधोभयसम्बन्धेन तस्यासम्बन्धित्वात्। किञ्च स्वमते सकर्त्तृकत्वस्य साध्यकोटावुपादानं न स्यात् सकर्त्तृक-त्वनिष्ठवृत्तित्वस्य कपालादिरूपवस्तुविशिष्टत्वेन शून्यान्तदलेन तद्वारणात्, नचैवं चैत्रवैशिष्ट्यस्य निरुक्तोभयसम्बन्धेन सकर्त्तृकत्वनिष्ठवृत्तित्वे सत्वात् कृतिमदंशप्रवेशेऽपि तद्दोष-तादवस्थ्यमिति वाच्यं कृतिमद्विशिष्टवृत्तित्वशून्यत्वातमक-

सिद्धेरुद्देश्यत्वेन साक्षात् सकर्त्तृकत्वसाधनाय गुरुसाध्यानुसरणात्, साध्यान्तरेण प्रकृतसाध्यस्य गुरुशरीरस्याप्यन्यथाकर्त्तुमशक्यत्वात, दुरूहसाध्योपन्यासस्य युक्ततायाः प्राक् प्रतिपादितत्वाच्च। अन्यथा क्षितिः सकर्त्तृकेति लघुसाध्योपेक्षा निर्व्वीजा स्यात्। नच नित्यानित्यसाधारणदृष्टान्तलाभाय तदुपेक्षा युक्तेतिवाच्यं प्रत्यक्षयोग्यघटादेर्दृष्टान्तत्वे सम्भवति परोक्षाणां दृष्टान्ततया लाभस्याकिञ्चित्करत्वादिति विशिष्टैकसाध्यस्थापनप्रकाराः।

अथ प्रकारान्तरम्। तत्र सकर्त्तृकेत्यादिसाध्यनिर्द्देशवाक्ये प्रथमान्तपदत्रयमस्ति—तथाहि सकर्त्तृकेत्येकम्, अकर्त्तृकवृत्तित्वरहितेत्यन्यत्, अनेकाकर्त्तृकवृत्तित्वरहितानेकतन्निष्ठाधिकरणमित्यपरम्। पूर्व्वद्वयं पृथिवीविशेषणतया स्त्रीलिङ्गम् अन्त्यन्तु अजहल्लिङ्गम्। इति साध्यत्रयं पर्य्यवसितम्। चकाराद्यभावेऽप्यसमस्तविभिन्नपदाद् विभिन्नसाध्यबोधो नाप्रसिद्धः, साध्यव्याप्यहेतुमान् पक्षः साध्यवानिति दीधितिव्याख्यायां गदाधरभट्टाचार्य्येण साध्यद्वयनिर्द्देशपक्षव्यवस्थापनात्। इयं पृथिवी सकर्त्तृका मेयत्वादित्येवोऽनुमानप्रदर्शनाकारः अकर्त्तृकवृत्तित्वरहिता मेयत्वादित्यपरः अनेकाकर्त्तृकवृत्तित्वरहितानेकतन्निष्ठाधिकरणं मेयत्वादिति तृतीयः। अन्त्ययोः पक्षस्तु प्रथमवदेव। साध्यनिर्द्देशवाक्यानामसमस्तत्वे पक्षादिपदानामावृत्त्या न्यायघटकत्वसम्भवात्। नच मेयत्वं हेतुः सकर्त्तृकत्वादौ साध्ये व्यभिचारी नित्यसाधारणत्वादिति वाच्यम् परिमेयत्वरूपमेयत्व-

स्य हेतुत्वात्, परिमेयत्वं च परिमातुं शक्यत्वं, तुलादिना सूत्रादिना वा मानसाधनेन निर्णेयपरिमाणविशेषत्वमिति फलितं तच्च सावयवद्रव्यमात्रवृत्तीति व्यभिचारासम्भवात्। स च गुरुत्वविशेषो वा परिमितिविशेषो वा अन्यो वा धर्म्मो यथा भवतु नित्ये नास्त्येवेति । ननु परिच्छिन्नपरिमाणवति गुरुत्ववति च परमाणौ तदभ्युपगमे बाधकाभावाद् व्यभिचारतादवस्थ्यम् तद्वृत्तिपरिमाणादेः प्रकृतिप्रत्ययालभ्यत्वेऽप्युपादाने तु लाक्षणिकत्वापत्तिः,-नच मातुं शक्यत्वं परमाणौ नास्ति अतीन्द्रियत्वादिति वाच्यं तथा सति तादृशमेयत्वस्य द्व्यणुकेऽप्यभावेन भागासिद्धेः द्व्यणुकस्याप्यतीन्द्रियत्वादित्यतः साध्यान्तरमाह अकर्त्तृकवृत्तित्वरहितेति, अकर्त्तृकश्च वृत्तिश्च तयोर्भावः अकर्त्तृकवृत्तित्वम् अकर्त्तृकत्वं वृत्तित्वञ्च तदर्थः तद्रहिता, वृत्तिरिति कर्त्तरि क्तिन् । नित्यद्रव्ये वृत्तित्वराहित्यादुभयराहित्यं वृत्तौ जन्यद्रव्ये अकर्त्तृकत्वराहित्यादुभयराहित्यं जन्यत्वेन वादिप्रतिवादिभ्यामङ्गीकृते द्व्यणुकादौ वृत्तिस्वरूपे अकर्त्तृकत्वविरहेणोभयाभावसिद्ध्या सकर्त्तृकत्वसिद्धिः। मेयत्वस्य केवलान्वयिरूपस्यैव प्रसिद्धतया तथाविधहेतौ यत्साध्यस्याव्यभिचारित्वं तदाह अनेकाकर्त्तृकवृत्तित्वरहितेत्यादि। एकमात्राकर्त्तृके सकर्त्तृके च यद्वर्त्तते एकैकपरमाणुघटान्यतरत्वमेकैकजातिपटाद्यन्यतमत्वं समवायसकर्त्तृकान्यतमत्वादिकं च तदेवानेकाकर्त्तृकवृत्तित्वरहितम् अनेकतन्निष्ठं च, अनेकनिष्ठं तन्निष्ठं च पूर्व्ववद्द्वन्द्वगर्भसमासः, अथवा अनेकं तन्निष्ठ-

मिति कर्म्मधारयः, एकमस्यास्ति इत्येकमर्शआदित्वादच्, अस्येति सम्बन्धश्चाश्रयत्वरूपः गुरोर्देशः निःस्वानां ग्रामः इत्यादिवत् एकमात्राधिकरणकमितियावत् तन्न भवतीत्यनेकं नास्ति एकं यस्येति तु भट्टाचार्य्याः । तन्निष्ठमित्यत्र तत्पदं वृत्तित्वरहितपरम् । अनेकाकर्त्तृकवृत्तित्वरहितेत्यत्र प्रक्रान्तेषु समानाधिकरणयोरनेकाकर्त्तृकयोरनेकमात्रग्रहणेनेतरस्याकर्त्तृकस्य वर्जनं सिद्धमिति पारिशेष्यात् , यद्धि वृत्तित्वरहितं तदपि नियमेनानेकाकर्त्तृकवृत्तित्वरहितमकर्त्तृकवृत्तित्वरहितञ्चेति प्रकर्षाच्च तत्पदेन वृत्तित्वरहितमात्रग्रहणम् । तत्तु नित्यद्रव्यम् । वृत्तित्वरहितत्वरूपेण तस्य न्यायशरीरे प्रवेशः । एवञ्च द्रव्यत्वादेर्विशेष्यदललभ्यत्वेऽपि अनेकाकर्त्तृकवृत्तित्वराहित्यरूपविशेषणविरहेण न सिद्धसाधनादिप्रसङ्गः । एकैकनित्यद्रव्यमात्रवृत्तिधर्म्मातत्तद्व्यक्तित्वादिनिरूपकताकाधिकरणत्वानामनन्तानाम् मितिविधेयत्वव्युदासायानेकेति विशेष्यदलेऽन्तर्भावितम् । विधेयभेदेन पक्षतानुमित्योः कार्य्यकारणभावभेद इति प्राचां मतमाद् कारणलाघवसम्पिपादयिषयैवेदम् । नन्वेवं घटत्वादौ व्यभिचारः, घटत्वमात्रवृत्तिधर्म्मस्य अनेकनिष्ठत्वाभावात् वृत्तित्वरहितनिष्ठत्वाभावाच्च । घटत्वघटान्यतरत्वादेर्वृत्तित्वरहितनिष्ठत्वाभावात् घटत्वगगनान्यतरत्वादेरनेकाकर्त्तृकवृत्तित्वाच्च गगनद्वय कान्यतरत्वस्य तु निरुक्तरूपस्याभाव इति घटत्वे प्रमेयत्वस्य वर्त्तेरिति वाच्यम् अनेकाकर्त्तृकेत्यत्राकर्त्तृक-

पदस्याकर्तृकद्व्यणुकस्य घटत्वगगनान्यतरत्वादेः साध्यकोटिप्रविष्टतया व्यभिचारासम्भवात् । तद्द्व्यणुकघटान्यतरत्वादेवृत्तित्वरहितवृत्तित्वाभावान्नार्थान्तरादिशङ्का । एकैकपरमाणुद्व्यणुकान्यतरत्वस्य निरीश्वरमतेऽनेकाकर्तृकवृत्तित्वमिति न तन्मतेऽर्थान्तरं स्वमते तादृशान्यतरत्वसिद्ध्यैव सकर्तृकत्वसिद्धिः । इति निरवद्यम् ।

यत् तु एतत्पंक्त्यर्थविवृतये मनीषिभिरनुयुक्तानां पूज्यपाद-महामहोपाध्याय-राखालदासन्यायरत्नभट्टाचार्यमहाशयानामद्वैतखण्डनपरिशिष्टप्रकाशितं प्रतिवचनं "सकर्तृकादिवाक्यात् साध्यत्रयबोधः तत्र प्रथमरहितान्तेनैकं साध्यं बोध्यते तच्च कृतिमज्जन्ये तदजन्ये चोभयत्र वृत्तित्वरहितरूपम् अत्र कल्पे एतत् पृथिवीगततत्तद्व्यक्तित्वादेरपि साध्यान्तर्गततया प्राप्तत्वेन मतद्वय एव क्लृप्तत्वेन सिद्धसाधनमित्यपरितोषेण कल्पान्तरमादृतम् कल्पान्तरीयप्रथमसाध्यमनेकाकर्तृकवृत्तित्वरहितानेकेत्यन्तेन लब्धम् । साध्ये अनेकाकर्तृकवृत्तित्वराहित्यविशेषणं तु पक्षीभूततत्पृथिव्यां सकर्तृकत्वसिद्धिप्रयोजनकम्, विशेष्यांशानुपादाने पक्षगततत्तद्व्यक्तित्वरूपसाध्यघटकपदार्थमादाय सिद्धसाधनम् । एवं च ईदृशानुमानात् साध्यतावच्छेदकरूपेण तत्पृथिवीगगनान्यतररूपनित्यव्यक्तान्यतरत्वस्यैव पक्षेऽनुमितिविषयतया तत्पृथिव्यां सुतरां सकर्तृकत्वसिद्धिपर्यवसानम् । ईदृशानुमितिश्चाकर्तृकद्व्यणुकवृत्तित्वज्ञानं प्रति विरोधिनी, अतस्तत्राकर्तृकत्वशङ्का कथमपि न

भवितुं प्रभवेत् । तत्पृथिव्यां अकर्तृकत्वपदान्तरान्दमते प्रकृतसाध्यतावच्छेदकरूपेण पदघटान्यतरत्वस्यापि तादृशा-नुमानविषयतया प्राप्तत्वेन तत्राकर्तृकत्ववादिनामपीष्टसि-द्धिरित्यस्वरसात् कल्पान्तरमाह तदित्यादिना । तृतीयकल्पीय-साध्यन्तु अकर्तृकव्यावृत्तित्वे सति तन्निष्ठम् अर्थात् अकर्तृक-निष्ठं प्रागभावप्रतियोगिनिष्ठमितियावत् न तु नित्यवृत्ति-धर्म्मस्तथा सति प्रागभावे व्यभिचारः स्या"–दित्यन्तम् तदनु-युञ्जानानां मतिवैभवपरीक्षार्थं प्रौढिवादमात्रं न तु वास्तवम् । प्रतिज्ञादिघटितन्यायैकदेशस्यानुमानाकारतया प्रसिद्ध्या प्रकृ-तानुमित्यन्यूनानतिरिक्तबोधकवाक्यस्य प्रतिज्ञात्वेन साध्यत्रय-बोधकैकवाक्यस्य प्रतिज्ञात्वासम्भवादनुमानाकारप्रदर्शनाय ता-दृशवाक्यप्रयोगस्यायुक्तत्वात्, साध्यत्रयबोधकवाक्यस्य वि-शेषणकर्म्मधारयसमासत्वे प्रत्येकप्रकारकैकैकमुख्यविशेष्यक-बोधानुपपत्तेः नहि शीतोष्णं जलमित्यतः शीतं जलमुष्णं जलञ्चेति बोधो भवति, भवति तु शीतोष्णं जलमित्येकमुख्य-विशेष्यकविशिष्टबोधः, समाहारद्वन्द्वाभ्युपगमे च ततोऽपि नैकैकमुख्यविशेष्यकप्रत्येकप्रकारकबोधः तथा सति सच्छिद्र-निच्छिद्रं घट इत्यपि प्रयोगः सच्छिद्रो घटः निश्छिद्रश्च घट इति बोधयन् साधुः स्यात् । किञ्च समस्तवाक्यस्यैक-साध्यपरत्वे सम्भवति समासघटकवाक्येभ्यः खण्डशः साध्यत्रयबोध इत्येतादृशकल्पनाया अन्याय्यत्वात् । अन्यथा पर्व्वतः पर्व्वतीयवह्निमानित्यादावपि पर्व्वतीयत्वमात्रावच्छिन्न-

वह्नित्वमात्रावच्छिन्न[illegible]ाध्ययोर्बोधः स्यात् । [illegible] पक्षीभूत-द्व्यणुकादावकर्त्तृकत्वसिद्ध्यार्थान्तराच्च । अपिच द्वितीयकल्पे यत्किञ्चिद्द्व्यणुकघटादिगतान्यतरत्वमादाय सिद्धसाधनं द्वितीयकल्पपरित्यागवीजतया स्वयमुपदर्शितं, प्रथमकल्पपरित्यागवीजं च पक्षीभूतद्व्यणुकादिगततत्तद्व्यक्तित्वमादाय सिद्धसाधनमिति स्वयमुक्तम् । तथा च प्रथमद्वितीयकल्पदोषस्तृतीयेन परिहरणीयः न च तथा भवति,यतोऽकर्त्तृकद्वयावृत्तितन्निष्ठाधिकरणत्वमत्र साध्यं तत्पदञ्चाकर्त्तृकवाचकं तस्य प्रक्रान्तत्वात् । एवं स्थिते द्व्यणुकादिगततत्तद्व्यक्तित्वमादाय तद्द्व्यणुकघटादिगतान्यतरत्वमादाय च सिद्धसाधनमत्र तदवस्थम्, न चाकर्त्तृकनिष्ठेतिविशेष्यदलस्थाकर्त्तृकपदं प्रागभावाप्रतियोगिपरं तेनैव तद्दोषवारणं भवतीति वाच्यं साध्यनिर्द्देशे विशेष्यांशे साक्षादकर्त्तृकपदासत्त्वात् तत्पदस्य च सत्त्वात् तत्पदस्य प्रक्रान्तकृतिमदजन्यस्वरूपाकर्त्तृकबोधकतया प्रागभावाप्रतियोगिबोधकत्वासम्भवात्,न च कृ[illegible]घटकाजन्यस्य प्रक्रान्ततया तस्यैव प्रागभावाप्रतियोग्यर्थकत्वमिति वाच्यं तत्र जन्यताया अन्यथासिद्ध्यनिरूपकत्वादिरूपायाः कृतिमदन्वितया प्रवेशात् प्रागभावाप्रतियोग्यर्थकाजन्यस्य प्रक्रान्तत्वाभावात् । न च यद्यत् कृतिमदजन्यं तत् तत् प्रागभावाप्रतियोगीति वस्तुगतिमनुरुध्य तस्य प्रक्रान्तत्वमुच्यत इति वाच्यं सकर्त्तृकाकर्त्तृकेत्यादेः कृतिमद्विशिष्टवृत्तिताशून्यार्थकत्वे तात्पर्य्यस्य प्रागुपवर्णितत्वेन कृतिमदजन्यस्याप्रवेशादेवाजन्यस्य कथमपि प्रक्रान्तत्वासम्भ-

था[illegible], [illegible]तायां वैशिष्ट्यं च [illegible]पतत्वस्याजन्य निरू-
पितत्वोभयसम्बन्धेनेत्युक्तमधस्तात्। अन्यथा जन्याकर्त्तृ-
कवृत्तित्वरहितेत्यस्य सम्यक्त्वेन प्रथमकृतिमदंशवैफल्यं स्यात्
द्वितोयतृतीयकल्पा[illegible]सराणां च निर्बीजं स्यात् पक्षोभू-
तद्व्यणुकादिगतत[illegible]व्यक्तित्वस्य परमते जन्यवृत्तितयाऽकर्त्तृ-
कवृत्तितया च साध्यकोटावप्रवेशात् स्वमते तत एव तत्र
सकर्त्तृकत्वसिद्धेः। किञ्च तदित्यादिना तृतीयकल्पः स्वयमु-
पन्यस्तः, तत्र तन्निष्ठाधिकरणत्वमात्रं लभ्यते, न तु अकर्त्तृक-
द्रव्यावृत्तित्वे सतीति स्वोक्तविशेषणम् द्वितीयकल्पोक्तसाध्यता-
वच्छेदकशरीर[illegible]कवृत्तित्वरहितस्य तदर्थकत्वे
सम्भवत्यपि तृतीये तत्प्रवेशासम्भवात्। न च स्वयमेव
पूरणेन तत्साध्योपन्यास इति युक्तं निष्कृष्टकल्पतया कथि-
तस्य चरमकल्पस्य द्रव्यत्वादिकमादाय प्रथमकल्पतोऽपि स्फु-
टतरसिद्धसाधनादिदुष्टत्वे [illegible]विशेषणेन तदुद्धारेऽपि मूल-
न्यूनताया वज्रलेपत्वात्। न हि तादृशं व्याख्यानं बहु मन्यते येन
मूलापकर्षः स्यादित्यादिकं निपुणतरं विभावनीयम्।

मनोरञ्जनवेदान्ततीर्थेनार्थत्रुभुत्सुना।
पृष्टस्य मे प्रतिवचो यदयं तस्य संग्रहः॥
शास्त्रतत्त्वानुसन्धानरससिन्धौ निमज्जतः।
सद्भिर्गुरुनिबन्धेऽपि क्षम्यं मे पाणिचापलम्॥
भूदेवकर्म्मरक्षायै विहितानेकचेष्टितः।
[illegible]कुन्ददेवः प्रीतोऽस्तु मम कल्पनयानया॥

इति [illegible]कुन्ददेवात्मानेदर्शने खण्डनफक्किकापंक्तिप्रसादन[illegible]।
भ[illegible]य-श्रीपञ्चाननतर्करत्नभ[illegible]चार्य्यकृतं
मुकुन्ददेवात्मनिदर्शनं समाप्तम्॥